# Krishnastutih

# कृष्णस्तुतिः

## Document Information

Text title : Krishna Stuti 1

File name : kRRiShNastutiHvAdirAja.itx

Category : vishhnu, vAdirAja, vishnu, stuti, krishna, aShTaka

Location : doc_vishhnu

Author : vAdirAjayati

Proofread by : Meenakshi Premanand, Revathy R.

Latest update : May 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 24, 2024

*sanskritdocuments.org*

# कृष्णस्तुतिः

यदि दिशसि नयनपटुतां तर्हि भवच्चरणकमलसेवायै ।
आयास्यामि दयाळो कृष्ण न चेत् पूजयामि कथमन्धः ॥ १॥

सम्भावितस्य पुंसो मरणादतिरिच्यते किला कीर्तिः ।
इति गीतासु हि गीतं भवता भवतापतिमिर रवे ॥ २॥

नानापराधशतकं हीने यद्यस्ति कृष्ण मयि मत्ते ।
दीनानामुद्धात्रा क्षन्तव्यं तत् क्षमावता भवता ॥ ३॥

कुन्तलसन्ततिलसितं चूडात्रयशोभिमौलिभागमहम् ।
शतपत्रपत्रनेत्रं शशिवदनं प्रतिदिनं दिदृक्षामि ॥ ४॥

कुण्डलमण्डितगण्डं कम्बुग्रीवं मनोरमोरस्कम् ।
दण्डं दाम च दधतं पाण्डवसखमर्च्यमर्चयामि कदा ॥ ५॥

रम्यतमोदरजघनं कम्रोरुं वृत्तजानुयुगजङ्घम् ।
रक्ताब्जसदृशपादं हस्ताभ्यां त्वार्चयामि सदय कदा ॥ ६॥

दोषातिदूर शुभगुणराशिं दासीकृताखिलानिमिषम् ।
भूषणभूषितगात्रं नेत्राभ्यां चित्रचरित वीक्षे त्वाम् ॥ ७॥

मध्वप्रतिष्ठितं त्वां विध्वस्ताशेषकुजनकुलम् ।
मूर्ध्ना प्रणम्य याचे तद्विरचय यद्धितं ममाद्य हरे ॥ ८॥

स्तुतिमितिपुण्यकथन ते प्रथितकृते वादिराजयतिरकृत ।
सततं पठतां हि सतामतिविशदां देहि कृष्ण विततमतिम् ॥ ९॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं कृष्णस्तुतिः सम्पूर्णम् ।
भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Meenakshi Premanand

*Krishnastutih*

pdf was typeset on May 24, 2024

Please send corrections to *sanskrit@cheerful.com*